# 82 - द्व्यशीतितम दशकम्
## बाणासुर युद्धम्, नृग शाप मोक्षम् च

प्रद्युम्नो रौक्मिणेयः स खलु तव कला शम्बरे णाहृतस् तं
हत्वा रत्या सहाप्तो निजपुर महरद् रुक्मि कन्यां च धन्याम् ।
तत् पुत्रोऽथानि रुद्धो गुणनिधि रवह द्रोचनां रुक्मि पौत्रीं
तत्रो द्वाहे गतस् त्वं न्यवधि मुसलिना रुक्म्यपि द्यूत वैरात् ॥82-1॥

बाणस्य सा बलि सुतस्य सहस्र बाहोः
माहेश्वरस्य महिता दुहिता किलोषा ।
त्वत् पौत्रमेन मनिरुद्ध मदृष्ट पूर्वं
स्वप्नेऽनु भूय भगवन् विरहातुराऽभूत् ॥ ॥82-2॥

योगिन्य तीव कुशला खलु चित्रलेखा
तस्यास् सखी विलिखती तरुणा नशेषान् ।
तत्रा निरुद्ध मुषया विदितं निशायाम्
आनेष्ट योग बलतो भवतो निकेतात् ॥ ॥82-3॥

कन्यापुरे दयितया सुख मारमन्तं
चैनं कथञ्चन बबन्धुषि शर्व बन्धौ ।
श्रीनारदोक्त तदुदन्त दुरन्त रोषैः
त्वं तस्य शोणित पुरं यदुभिर् न्यरुन्धाः ॥ ॥82-4॥

पुरी पालश् शैल प्रिय दुहितृ नाथोऽस्य भगवान्
समं भूत व्रातैः यदु बल मशङ्कं निरुरुधे ।
महाप्राणो बाणो झटिति युयुधानेन युयुधे
गुहः प्रद्युम्नेन त्वमपि पुरहन्त्रा जघटिषे ॥ ॥82-5॥

निरुद्धा शेषास्त्रे मुमुहुषि तवास्त्रेण गिरिशे
द्रुता भूता भीता: प्रमथ कुल वीरा: प्रमथिता: ।
परास्कन्दत् स्कन्द: कुसुम शर बाणैश्च सचिव:
स कुम्भाण्डो भाण्डं नव मिव बले नाशु बिभिदे ॥ ॥82-6॥

चापानां पञ्चशत्या प्रसभ मुपगते छिन्न चापेऽथ बाणे
व्यर्थे याते समेतो ज्वर पति रशनै: अज्वरि त्वज् ज्वरेण ।
ज्ञानी स्तुत्वाऽथ दत्वा तव चरित जुषां विज्वरं स ज्वरोऽगात्
प्रायोऽन्तर् ज्ञानवन्तोऽपि च बहु तमसा रौद्र चेष्टा हि रौद्रा:॥ ॥82-7॥

बाणं नाना युधोग्रं पुनरभि पतितं दर्प दोषात् वितन्वन्
निर्लू नाशेष दोषं सपदि बुबुधुषा शङ्करे णोपगीत: ।
तद् वाचा शिष्ट बाहु द्वितयं उभयतो निर्भयं तत्प्रियं तं
मुक्त्वा तद् दत्तमानो निज पुर मगमस् सानिरुद्धस् सहोष: ॥ ॥ 82-8॥

मुहुस् तावच्छक्रं वरुण मजयो नन्द हरणे
यमं बालानीतौ दव दहन पानेऽनिल सखम् ।
विधिं वत्स स्तेये गिरिश मिह बाणस्य समरे
विभो विश्वोत्कर्षी तदय मवतारो जयति ते ॥ ॥82-9॥

द्विज रुषा कृकलास वपुर् धरं नृग नृपं त्रिदि वालय मापयन् ।
निज जने द्विज भक्ति मनुत्तमाम् उपदिशन् पवनेश्वर् पाहिमाम् ॥82-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥